International Journal of Sanskrit Research 2019; 5(3): 143-145

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(3): 143-145
© 2019 IJSR
www.anantaajournal.com
Received: 28-03-2019
Accepted: 30-04-2019

**डा० प्रिति पारेष्वरि महान्ति**
आसिस्टेन्ट प्रोफेसर
(धर्मशास्त्रविभागः) राजकीय संस्कृत महाविद्यालय, भागलपुरम् बिहार, भारत

**Correspondence**
**डा० प्रिति पारेष्वरि महान्ति**
आसिस्टेन्ट प्रोफेसर
(धर्मशास्त्रविभागः) राजकीय संस्कृत महाविद्यालय, भागलपुरम् बिहार, भारत

# धर्मशास्त्रे गृह्यसूत्रस्य स्वरूपम्

**डा० प्रिति पारेष्वरि महान्ति**

**प्रस्तावना**

वेदानामनन्तरं वेदागड.ग्ानां प्रामाण्यं सुविदितचरम्। वेदाड.ग्ानि षाड़िति प्रसिद्धतरम्। तानि यथा–शिक्षा, कल्पः, व्याकरणं, छन्दः, निरुक्तं, ज्योतिषञ्चेति। तेषु कल्पोऽन्यतमः। वैदिककालादनन्तरं सूत्रकालः प्रदुरभूत्। सूत्रकाले सर्वाणि शास्त्राणि सूत्रमयान्यासन्। यथा व्याकरणे पाणिनिना कृतं पाणिनिसूत्रं, वेदान्ते व्यासकृतं ब्रह्मसूत्रं, मीमांसायां जैमिनिना कृतं जैमिनिसूत्रं, सांख्ये कपिलस्य सांख्यसूत्रं, वैशेषके कणादस्य वैशेषिकसूत्रं, साहित्ये भरतस्य नाट्यसूत्रं कपिलस्य छन्दःसूत्रं प्रसिद्धं तथा कल्पसूत्रमपि वेदाड.गे प्रसिद्ध भवति। कल्पसूत्रं चतुर्विधम्। श्रोतसूत्रं, शुल्वसूत्रं, धर्मसूत्रं, गृह्यसूत्रञ्चेति। श्रोतसूत्रेषु यागपद्धतय विवेचिताः, शुल्वसूत्रेषु यागस्य वेदीनां निर्माणपद्धतयश्च प्रतिपादिताः सन्ति। धर्मसूत्रेषु धर्मशास्त्रस्य प्रतिपाद्यविषयाः आचार–व्यवहार–प्रायश्चित्त–काल–संस्कार–श्राद्ध–शुद्धि–प्रतिष्ठा–नीतिप्रभृतीनां विचारो वर्त्तते। गृह्यसूत्रेषु च कर्मकाण्डविधयः प्रतिपादिताः। अर्थात् गर्भाधानादिविवाहान्तसंस्काररणां तत् तत् शाखानुसारेण विवेचन विहितम्। वेदशाखाभिः सह गृह्यसूत्राणां सुमहान् सम्बन्धो विद्यते। गृह्यसूत्राणि स्मार्त्तकर्माण्येव प्रदर्शयन्त्यपि शाखाविशेषमाश्रित्य व्यवतिष्ठन्ते।

तत्र गृह्यो नाम वैवाहिकाग्निः। तदुक्तं[1] खादिरगृह्यसूत्रे–यस्मिन्नग्नौ पाणिं गृह्णीयात् स गृह्यः इति। अत्र पाणिग्रहणमुपलक्षणम्, दायाद्यकाल एकेत्राम् इति[2] पारस्कराचार्याः। तेन कालान्तररहितस्यापि अग्नेरुपदिष्टत्वात्। सर्वथा गृह्योऽयमग्निः स्मार्त्त एव न श्रौतः। अतः पत्न्या सह अग्नौ क्रियमाणं कर्मैव गृह्यकर्मेति। तेषां कर्मणां विधानं यस्मिन् सूत्रग्रन्थे समुपलभ्यते तदेव गृह्यसूत्रमिति। कृतविवाहस्य गृहस्थस्य चतुर्विधपाकयज्ञसम्पादनार्थम् अग्नेरस्य नितरामावश्यकता विद्यते। तेन गृह्यस्य गृहस्थाश्रमस्य हितसाधकत्वेन[3] तस्मै हितमिति सूत्रेण गृह्यशब्दो निष्पद्यते। अपि च गृहशब्दपर्यायभूतैः उपानाऽऽवसथ–शालादिशब्दैरप्ययमग्निः व्यवह्रियते। यथा– औपासनाग्निः, आवसथ्याग्निः, शालारग्निरिति। विवाहकालेऽस्याधेयत्वेनाप्ययं वैवाहिकाग्निरित्यप्युच्यते। अतो गृह्यशब्दो अग्निपरोऽपि तदग्निसाध्यकर्मसु रूढः। अत एव गृह्याणां नाम गृह्याग्निसाध्यकर्मणां सूत्रं गृह्यसूत्रमिति।

पुनश्च किं नाम सूत्रमिति जिज्ञासायामुच्यते यत् सूत्र्यते इति व्युत्पत्त्या सूत्रशब्धः संक्षिप्तीकरणं बोधयति। लल्लक्षणं यथा–

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः।। इति।।

अनया सूत्रभाष्यया सर्वाण्येव गृह्याणि आचार्यैरुपनिबद्धानि। अतो गृहस्थो गृह्याग्नौ पत्न्या सह यानि कर्माणि अनुतिष्ठति तानि सर्वाणि यत्रोपनिबद्धानि तान्येव गृह्यसूत्राणीति।

**गृह्यसूत्रस्य भेदाः**

गृह्यसूत्राणि प्रति वेदंभिद्यन्ते। तत्रादौ ऋग्वेदस्य गृह्यसूत्रत्रयं विद्यते। 1) आश्वलायनगृह्यसूत्रं 2) शाड.ख्यायनगृह्यसूत्रं 3) कौषीतकगृह्यसूत्रम्। शुक्लयजुवेदस्य एकमात्रं पारस्करगृह्यसूत्रम्। कृष्णयजुवेदस्य बहूनि गृह्यसूत्राणि। तानि यथा– 1) बौधायनगृह्यसूत्रं 2) आपस्तम्बगृह्यसूत्रं 3) भारद्वाजगृह्यसूत्रं 4) हिरण्यकेशिगृह्यसूत्रं 5) सत्याषाढगृह्यसूत्रं 6) वाधूलगृह्यसूत्रं 7) मानवगृह्यसूत्रं 8) लौगाक्षिगृह्यसूत्रं 9) काठकगृह्यसूत्रं 10) वाराहगृह्यसूत्रमित्यादीनि। सामवेदस्य त्रीणि गृह्यसूत्राणि। तानि यथा – 1) गाभिलगृह्यसूत्रं 2) खदिरगृह्यसूत्रं 3) जैमिनीयगृह्यसूत्रमिति। तद्वदथर्ववेदस्य केवलमेकं कौशिकगृह्यसूत्रं वर्त्तते। नानावेदसम्बन्धीनि भवन्तीमानि गृह्यसूत्राणि। एतेषां गृह्यसूत्राणां संक्षेपेण परिचयः प्रदेयः।

**शांख्यायनगृह्यसूत्रम्**

शांख्यायनगृह्यसूत्रस्य सम्बन्ध ऋग्वेदेन सह वर्त्तते। गृह्यसूत्रमिदं षडध्यायसम्बलितं भवति। परन्त्वत्र चत्वार एवाध्याया मौलिकाः, अवशिष्टाध्यायद्वयं परिशिष्टरूपम्। अत्र प्रथमाध्यायेऽष्टाविंशतिखण्डाः, द्वितीयाध्यायेऽष्टादशखण्डाः, तृतीयाध्याये चतुर्दश, चतुर्थाध्याये एकोनविंशतिः, पञ्चमाध्याये दश तथा षष्ठाध्याये षट् खण्डाः सन्ति। तत्र प्रथमाध्याये गर्भाधानादारभ्य चूडाकरणान्तसंस्काराणां विवेचनं कृतम्। ततो द्वितीयाध्याये उपनयनसंस्कारस्य वैश्वदेवकर्मणश्च विवेचनं विहितम्। तदनन्तरं तृतीयाध्याये समावर्त्तनसंस्कार–गृहनिर्माणविधि–वृषोत्सर्गकर्माऽष्टकादिश्राद्धानाञ्च विचारो विहितः। ततश्चतुर्थाध्याये पार्वणैकोद्दिष्ट–सपिण्डीकरणा–ऽऽभ्युदायिकश्राद्धानां तर्पणोपाकरणादीनाञ्च विवेचनेन सह ब्रह्मचारिधर्मस्नातकधर्म–श्रवणाकर्मादीनामपि विचारः कृतः। तदनु पञ्चमाध्याये केषाञ्चित् प्रायश्चित्तानां विषये तथा पुष्करिण्यदिप्रतिष्ठाविषये च चर्च्चा विहिता। ततोऽन्तिमे षष्ठाध्याये शाक्वरादिव्रतानां विधानमपि कृतम्। अस्मिन् गृह्यसूत्रे सूत्राणि क्षुद्राणि सरलानि च भवन्ति। अत्र केषाञ्चिद् ब्राह्मणवचनानां समावेशोऽपि दृश्यते।[4] गृह्यसूत्रमिदं नारायणभाष्येण सह राजकोटस्थपरमारमुद्रणालये 1932 खीष्टाब्दे प्रकाशितम्। अस्याङ. ग्लानुवाद ओल्डेन्वर्गमहोदयेन कृतो वर्त्तते।

**कौषीतकगृह्यसूत्रम्**

गृह्यसूत्रमिदं ऋग्वेदस्य कौषीतकशाखासम्बन्धि वर्त्तते। अत्रत्यविषयवस्तुविवेचनं शांख्यायनगृह्यसूत्रस्य विषयविवेचनेन सह साम्यं विदधाति। परन्तु गृह्यसूत्रद्वयं सम्पूर्णं परस्परं भिन्नमेव। अस्मिन् गृह्यसूत्रे पञ्चाध्यायाः सन्ति। तत्र प्रथमाध्ये विद्यमानेषु एकविंशतिखडेषु विवाहादारभ्य चूडाकरणं यावत् सर्वेषां संस्काराणां विवेचनं कृतम्। ततो द्वितीयाध्याये विद्यमानेष्वष्टसु खण्डेषु उपनयनसंस्कारेण सह ऋष्याचार्यदेवतानां तर्पणविधिः विचारितः।

**बौधायनगृह्यसूत्रम्**

बौधायनगृह्यसूत्रं कृष्णयजुर्वेदस्य तैत्तिरीयशाखासम्बन्धि भवति। एतगृह्यसूत्रं चतुर्धा विभक्तम्। तद्यथा–गृह्यसूत्रं, गृह्यपरिभाषासूत्रं, गृह्यशेषसूत्रं, पितृमेधसूत्रञ्चेति। अस्य गृह्यसूत्रस्य प्रत्येकं भागः कतिचिद्भिः प्रश्नैर्विभाजितः। प्रत्येकं प्रश्नञ्च कतिचित् खण्डैरपि विभाजितम्। कृष्णयजुर्वेदीयगृह्यसूत्रेषु इदमेव प्राचीनतममिति मन्यते। अग्नवैश्यसूत्रेण बौधायनीयसूत्रस्यादिमत्वेन गणनाकृता। यथोक्तं तत्र–अथात्र सूत्रगणान् व्याख्यास्यामः। बौधायनमापस्तम्बं सत्याषाढं द्राहायणमायस्त्यं शाण्डिल्यमाश्वलायनं शाम्भव्यं कात्यायनमिति नवानि पूर्वसूत्राणि। वैखानसं शौनकीयं भारद्वाजमग्निवैश्यं जैमिनीयं वाधूलं माध्यन्दिनं कौण्डिन्यं कौषीतकमिति नवान्यपरसूत्राणीति। पुनश्च वृद्धमनुनाऽस्य मतमुत्थाप्यास्य सूत्रकारत्वेन प्रशंसापि कृता। दुर्गाकल्पप्रभृतीनां विचारो विहितः। तदनु चतुर्थाध्याये पितृमेधप्रकरणेऽन्त्येष्टिविचारं विधाय ग्रन्थस्य समापनं कृतम्। अस्य गृह्यसूत्रस्य प्रकाशनं गवर्णमेण्ट ओरियेण्टाल् लाइब्रेरीद्वारा मैसूरनगरे जातम्। सम्प्रत्यपि बौधायनीय–तैत्तिरीयशाखाध्यायिभिः गृह्यसूत्रमिदमनुसृत्य स्वसंस्कारादिकमनुष्ठीयते।

**आपस्तम्बगृह्यसूत्रम्**

एतद् गृह्यसूत्रमपि कृष्णयजुर्वेदस्य तैत्तिरीयशाखासम्बन्धि भवति। अस्मिन् गृह्यसूत्रे त्रयोविंशतिखण्डाः सन्ति। अत्र गर्भाधान–पुंसवन–सीमन्तोन्नयन–जातकर्म–नामकरणान्नप्राशनोपनयनोपाकरण–स्नान–विवाहप्रभृतिसंस्काराणां विचारों विहितः। अपि चात्र ग्रहानिष्टनिवारणार्थं विधिरापि वर्णितः। एतयोर्द्वयोः सम्प्रदाययोर्मध्ये श्रोत–गृह्य–धर्म–शुल्वादिचतुर्षु विषयेषु साम्यमपि परिलक्ष्यते।[5] अस्य गृह्यसूत्रस्य सम्पादनं डा. विण्टरनिस्मोदयेन 1889 खीष्टाब्दे वियेनानगर्यां कृतम्।

**भारद्वाजगृह्यसूत्रम्**

एतद् गृह्यसूत्रमपि कृष्णयजुर्वेदस्य तैत्तिरीयशाखासम्बन्धि भवति। आपस्तम्बगृह्यसूत्रेण सहास्य निकटसम्बन्धो विद्यते। अस्य श्रौतसूत्रमप्यधुना प्रकाशितम्। अस्य गृह्यसूत्रस्योपरि सम्प्रत्यपि न कापि टीका न किमपि भाष्यं वा प्रकाशितम्। अस्मिन् सम्पूर्णे गृह्यसूत्रे त्रय एव प्रश्ना वर्त्तन्ते। तत्रापि प्रत्येकं प्रश्नः बहुभिः खण्डैर्विभाजितः। उपनयनसंस्कारेणास्य ग्रन्थस्यारम्भोऽभूत्। अस्यान्ये विषयाः आपस्तम्बगृह्यसूत्रसमाना भवन्ति। तथापि क्वचिद् भेदो दृश्यते। यथाऽस्मिन् सन्दर्भे तेन सपिण्डीकरणान्त्येष्टिनान्दीश्राद्धप्रभृतिविषयाणां विवेचनमपि कृतम्। भाषादृष्ट्या च गृह्यसूत्रमिद मापस्तम्बगृह्यसूत्रस्य परवर्त्ति भाति। गृह्यसूत्रमिदं लाइडेमहोदयेन 1913 खीष्टाब्दे प्रकाशितम्।

**हिरण्यकेशीगृह्यसूत्रम्**

एतद् गृह्यसूत्रमपि कृष्णयजुर्वेदस्य तैत्तिरीयशाखासम्बन्धि भवति। अस्यापि गृह्यसूत्रस्य भारद्वाजगृह्यसूत्रमिवापस्तम्बगृह्यसूत्रेण सह निकटसम्बन्धो विद्यते। एतत् सत्याषाढगृह्यसूत्रमप्युच्यते। आपस्तम्ब–हिरण्यकेशीगृह्यसूत्रयोर्मध्ये पारस्परिकभेदः तथाऽधिकतया न दृश्यते। अत्रत्यविषयप्रतिपादनविधिरतीव सरलः स्पष्टश्च। विषयपर्यालोचनया ज्ञायते यत् गृह्यसूत्रमिदं भारद्वाजगृह्यसूत्रस्य परवर्त्ति। गृह्यसूत्रमिंद प्रश्नद्वयेन विभक्तम्। प्रति प्रश्नं चानके पटलाः, प्रति पटलञ्च बहवः खण्डा विद्यन्ते।[7] अस्य गृह्यसूत्रस्य प्रथमसंस्करणं डा. क्रीष्तेमहोदयेन वियेनानगर्य्यां 1889 खीष्टाब्दे प्रकाशितम्। अस्यांग्लानुवादोऽपि प्राच्यग्रन्थमालामध्ये प्रकाशितः।

**मानवगृह्यसूत्रम्**

अस्य गृह्यसूत्रस्य सम्बन्धो मैत्रायणीशाख्या सह विद्यते। भारद्वाजगृह्यसूत्रस्य परवर्त्त्येव गृह्यसूत्रमिदम्। अस्य विषयविभाजनं पुरुषैः खण्डैश्च कृतम्। अत्र गृह्यसूत्रान्तरापेक्षया नूतनविषयाः प्रतिपादिताः। अत्र संस्काराणां तथा गृह्यकर्मणां संक्षेपेणैवोल्लेखो वर्त्तते। सन्ध्योपासनविषयेऽत्र समीचीनो विचारो विहितः।[8] गृह्यसूत्रमिदमष्टावक्रभाष्येण सह गायकावाड ओरियेण्टाल् सीरिज् द्वारा प्रकाशितम्।

**काठकगृह्यसूत्रम्**

एतद् गृह्यसूत्रं कृष्णयजुर्वेदस्य काठकशाखया संम्बद्धम्। एतद् लौगाक्षिगृह्यसूत्रमप्युच्यते। मानवगृह्यसूत्रानन्तरमेवेदं गृह्यसूत्रमिति प्रतीयते, यतो हि मानवगृहसूत्रे विद्यमाना विषया अत्रापि दृश्यन्ते। अत्र पञ्चध्यायाः सन्ति। तस्मादिदं गृह्यसूत्रं गृह्यपञ्चिकाशब्देनाप्युच्यते। अत्राध्यायाः खण्डैर्विभाजिताः। अस्य गृह्यसूत्रस्य तिस्त्र एव टीकाः उपलभ्यन्ते। अस्यैकं संस्करणं[9] कैलैण्डमहोदयेन 1881 खीष्टाब्दे लाहोरनगरे प्रकाशितम्।

**वाराहगृह्यसूत्रम्**

कृष्णयजुर्वेदीयगृह्यसूत्रेषु वाराहगृह्यसूत्रं सर्वान्तिमं लघुकलेवरविशिष्टञ्च विद्यते। एकविंशतिभिः खण्डैः सम्पूर्णमिदं गृह्यसूत्रं विभाजितम्। अस्मिन् गृह्यसूत्रे मुख्यरूपेण केवलं संस्कारा पर्य्यालोचनं कृतम्। अन्ये गृहस्थधर्मा अत्र नैव प्रतिपादिताः। अत्र मानवगृह्यसूत्र–काठकगृह्यसूत्रयोः विषयान् संगृह्य विवेचनं कृतम्। भाषादृष्ट्य च वाराहगृह्यसूत्रमिदं सर्वान्तिममिति प्रतीयते।[10] गृह्यसूत्रमिदं पञ्चबविश्वावद्यालयपक्षतः लाहोरनगरे 1932 खीष्टाब्दे प्रकाशितम्।

**गोभिलगृह्यसूत्रम्**

गृह्यसूत्रमिदं सामवेदस्य कौथुमिशाख्या सह सम्बद्धम्। सामवेदीयगृह्यसूत्रेषु गृह्यसूत्रमिदं सर्वप्राचीनं भवति। एतत् प्रपाठकचतुष्टयेन विभक्तम्। अत्र ब्रह्मयज्ञ–दर्शपौर्णमासादीनां विधानं वर्त्तते। पुनश्च गर्भाधान – पुंसवन – गोपालन – गोयज्ञाश्वयज्ञ – विवाह – श्रावणीकर्मादीनां विचारोऽपि वर्त्तते। एतदतिरिक्तमत्रापि

कार्यसिद्ध्युपयोगिकर्माणि तथा गृहनिर्माणदिविधयो विचारिताः। गृह्यसूत्रमिदं कलकत्तानगरे 1922 खीष्टाब्दे प्रकाशितम्।

### खादिरगृह्यसूत्रम्

सामवेदस्य राणायनीयशाखया सहास्य गृह्यसूत्रस्य सम्बन्धो वर्त्तते। गृह्यसूत्रमिदं गोभिलगृह्यसूत्रस्य विषयाधारेण किंचित् परिवर्त्तनपूर्वकं लिखितम्।[11] गृह्यसूत्रस्यास्य रुद्रस्कन्धटीकया सह मैसूरनगरे प्रकाशनं जातम्।

### जैमिनीयगृह्यसूत्रम्

गृह्यसूत्रमिदं सामवेदस्य जैमिनीयशाखया सह सम्बद्धम्। एतत् खण्डद्वयेन विभक्तं दृश्यते। तत्र प्रथमखण्डे चतुर्विंशतिकण्डिकाः द्वितीयखण्डे च नव कण्डिकाः सन्ति। अत्र पुरुषसूक्तस्य सप्तानामृचामुल्लेखो वर्त्तते। अत्र गृह्यकर्मणां तथा संस्कारणां विषये चर्च्चा दृश्यते। सामवेदीयगृह्यसूत्रेष्विदमन्तिमं गृह्यसूत्रमिति कथ्यते।[12] कैलैण्डमहोदयेनास्यैकं संस्करणं पज्जबसंस्कृतसीरिज् द्वारा लाहोरनगरे प्रकाशितम्।

### कौशिकगृह्यसूत्रम्

एतदथर्ववेदसम्बन्धि एकमात्रं गृह्यसूत्रम्। अत्र चतुर्दशाध्यायाः सन्ति। अस्मिन् गृह्यसूत्रे गृह्यकर्म–संस्काराद्यतिरिक्तमथर्ववेदसम्बन्धिनः केत्र्चानाभिचारिका मन्त्रा अपि दृश्यन्ते। ऐन्द्रजालिकविधीनामपि प्रयोगोऽत्र दृश्यते। तद् दृष्ट्या गृह्यसूत्रस्यास्य महत्त्वं सातिशयं वर्त्तते। अस्य गृह्यसूत्रस्य व्याख्याद्वयं दृश्यते। एको व्याख्याकारो हारिलः, अपराश्च केशव इति। अस्य गृह्यसूत्रस्यैकं संस्करणं[13] ब्लूमफील्डमहोदयेन 1890 खीष्टाब्दे अमेरिकामहादेशस्य न्यूहावेननगरे प्रकाशितम्। द्वितीयं संस्करणं हिन्द्यनुवादेन सह 1942 खीष्टाब्दे मुजफरपुरनगरे प्रकाशितम्।

### संदर्भ सूची


1. खा. गृ. सू. – 1–5–1
2. पा. गृ. सू. – 1–2–2
3. खा. गृ. सू. – 5–1–5
4. आ. गृ. सू. भू. पृ. – 14
5. आ. गृ. सू. भू. पृ. – 14
6. आ. गृ. सू. पू. पृ.– 16
7. आ. गृ. सू. भू. पृ. – 16
8. आ. गृ. सू. भू. पृ.– 17
9. आ. गृ. सू. भू. पृ. – 17
10. आ. गृ. सू. भू. पृ. – 17
11. आ. गृ. सू. भू. पृ. – 17
12. आ. गृ. सू. भू. पृ. – 17
13. आ. गृ. सू. भू. पृ. – 18
14. आ. गृ. सू. भू. पृ. – 18